**तुन्नसेवनी** स्त्री तुन्नं छिन्नं सीव्यतेऽनया सिव–करणे ल्युट् ङीप्। सूचीभेदे “प्रवेश्य तुन्नसेवन्या मुष्कौ सीव्येत् ततः परम्” सुश्रुतः। [तुतुम्पतुः तुतुम्पिथ।

**तुन्प** बधे भ्वा॰ सक॰पर॰ सेट्। तुम्पति अतुम्पीत्। तुतुम्प

**तुन्प** बधे सक॰ क्लेशे अक॰ तु॰ पर॰ सेट्। तुपति-तुम्पति अतु(पी)म्पीत्। तुतु(पु)म्प तुतु(पु)म्पतुः तुतुपिथ तुतुम्पिथ

**तुन्फ** बधे भ्वा॰ पर॰ सक॰ सेट्। तुम्फति अतुम्फीत्। तुतुम्फ तुतुफ(म्फ)तुः। तुतुम्फिथ।

**तुन्फ** बधे सक॰ क्लेशे अक॰ तुदा॰ पर॰ सेट्। तुफति तुम्फति अतु(तु)म्फीत्। तुतु(तु)म्फ तुतुफ(म्फ)तुः तुतुफिथ तुतुम्फिथ।

**तुप** बधे भ्वा॰ पर॰ सक॰सेट्। तोपति अतोपीत्। तुतोप।

**तुप** बधे सक॰ क्लेशे अक॰तुदा॰ मुचादि॰पर॰ सेट्। तुम्पति अतोपीत्। तुतोप। पारस्क॰ सुट्। प्रस्तुम्पति।

**तुप** अर्द्दने चुरा॰ उभ॰ सक॰ सेट् इदित्। तुम्पयति ते अतुतुम्पत्-त्। तुम्प्यते। [अतोफीत्। तुतोफ।

**तुफ** बधे सक॰ क्लेशे अक॰ तु॰ मुचा॰ पर॰ सेट्। तुम्फति

**तुफ** बधे भ्वा॰ पर॰सक॰सेट्। तोफति अतोफीत्। तुतोफ।

**तुब** अर्द्दने वा चुरा॰ उभ॰ सक॰ पक्षे भ्वा॰ पर॰ सेट् इदित्। तुम्बयति-ते तुम्बति अतुतुम्बत्-त अतुम्बीत्। [लृदित्। अतुभत् अतोभिष्ट। तुतुभे।

**तुभ** हिंसे भ्वा॰ आत्म॰ लुदि उभ॰ सक॰ सेट्। तोभते।

**तुभ** हिंसायां दिवा॰ क्र्या॰ च पर॰ सक॰ सेट्। तुभ्यति तुभ्नाति अतोभीत्। तुतोभ “संक्रुद्धो मुष्टिनातुभ्नाद-क्रुद्धोऽनु महोदरम्” “अस्मान् विभीषणोऽतुभ्नात्” भट्टिः।

**तुम** प्रेरणे आहनने च तुम्रशब्दे माधवः। सक॰ भ्वा॰ पर॰ सेट्। तोमति अतोमीत् तुतोम तुम्रः। तोमरः।

**तुमुर** न॰ तुमुल+लस्य रः। तुमुले अमरटीका।

**तुमुल** पुंन॰ सौ॰ तु–मुलन्। १परस्परसंघातेन सङ्कुले युद्धे २कलिद्रुमे मेदि॰ ३व्याकुलयुद्धे न॰ त्रिका॰। “बभूव युद्धं तुमुलं जयैषिणोः” रघुः ४सङ्कुलमात्रे त्रि॰। “उभयोरपि पार्श्ववर्त्तिनां तुमुलेनार्त्तरवेण वेजिताः” रघुः

**तुम्ब** पुंस्त्री॰तुम्बति रुचिं तुबि–अर्द्दने अच्। १अलाब्वाम् भरतः। २वृहत्फलायाम्, राजनि॰। ३आमलक्यां, ४गवि च स्त्री। स्वार्थे क तत्रार्थे शब्दरत्ना॰। स्त्रीगव्यां अलाब्वां स्त्री त्रिका॰। टाप्।

**तुम्बर** न॰तुम्बं तदाकारं राति–रा आदाने क। (तानपूरा) १वाद्यभेदे तुम्बरचक्रम्। २तुम्बुरुगन्धर्वे च।

**तुम्बरचक्र** न॰ नरपतिजयचर्य्योक्ते चक्रभेदे चक्रशब्दे २८२४ पृ॰ दृश्यम्।

**तुम्बरु** पु॰ गन्धर्वभेदे। “सुप्रिया चातिबाहुश्च विख्यातौ च हाहाहुहूः। तुम्बरुश्चेति चत्वारः स्मृता गन्धर्वसत्तमाः” भा॰ आ॰ ६५ अ॰।

**तुम्ब(म्ब)वन** न॰ देशभेदे स च देशः वृ॰ सं॰ दक्षिणस्यामुक्तः “अथ दक्षिणेन लङ्केत्युपक्रमे” तुम्ब(म्ब)वनकार्मणेयक याम्योदधितापसाश्रमा ऋषिकाः” १४ अ॰।

**तुम्बि(म्बी)** स्त्री तुबि–इन्। १अलाब्वां (लाउ) शब्दरत्ना॰ वा ङीप् तत्रार्थे अमरः। “तुम्बी गोमांसतुल्या स्यात्” ति॰ त॰ नवम्यां तद्भक्षणनिषेधः। स्वार्थे क। तुम्बिका तत्रार्थे कटुतुम्ब्याञ्च राजनि॰।

**तुम्बिनी** तुबि–णिनि ङीप्। कटुतुम्ब्यां राजनि॰।

**तुम्बिपुष्प** न॰ तुम्बेरिव पुष्पमस्याः। लताम्बुजे हारा॰। ६त॰। अलाबूपुष्पे च।

**तुम्बुक** न॰ तुबि उक। अलाबूफले हड्डचन्द्रः।

**तुम्बुर** पु॰ विन्ध्यपर्वतस्थे जातिभेदे। “ये चान्ये विन्ध्यनिलयास्तु(षा)खारास्तुम्बुरास्तथा” हरिवं॰५ अ॰। [मेदि॰।

**तुम्बुरी** स्त्री तुबि+बा॰उर गौरा॰ङीष्। १शम्यां २धन्याके च

**तुम्बुरु** पु॰ १गन्धर्वभेदे जटा॰। २अर्हदुपासकभेदे हेम॰। “गन्धर्वैः सहितः श्रीमान् प्रागायत च तुम्बुरुः” भा॰ आ॰ १२३अ॰।३वृक्षभेदे। “तुम्बुरुः सौरभः सौरोवनजः सानुजोऽन्धकः। तुम्बरु प्रथितं तिक्तं कटु पाकेऽपि तत् कटु। रूक्षोष्णं दीपनं तीक्ष्णं रुच्यं लघु विदाहि च। वातश्लेष्माक्षिकर्णौष्ठशिरोरुक्गुरुताक्रमीन्। कुष्ठशूला रुचिश्वासप्लीहकृच्छ्राणि नाशयेत्” भावप्र॰।

**तुम्र** त्रि॰तुम–प्रेरणे आहनने च रक्। १प्रेरके २हिंसके च “सत्राहणं दाधृषिं तुम्रमिन्द्रम्” ऋ॰ ४।१७।८। “तुम्रं प्रेरकम्” भा॰ “आगत्या तुम्रो वृषभो मरुत्वान्” ऋ॰ ३।५०।१। तुम्रः आहन्ता तुमिराहननार्थः” भा॰।

**तुर** त्वरणे जुहो॰ पर॰ अक॰ सेट्। तुतोर्त्ति अतोरीत्। तुतोर। वैदिकोऽयम् धातुः। “अपामिवेदूर्मयस्तर्तुराणाः” ऋ॰९।९५।३। ताच्छील्ये चानश्। अभ्यासस्यातोऽत्त्वं च “महिष्ठे तुरतस्तुरस्य” ऋ॰६।१८।४। “अर्को वा यत्तुरते” तै॰ स॰२।२।१२।४। वेदे गणव्यत्ययः पदव्यत्ययश्च। अस्मादन्त-चुरादित्वमपि। तुरयति। “तुरयन्नृजिप्यः” ऋ॰४।३८।७।

**तुर** त्रि॰ तुर–क। वेगवति। “प्र तव्यसो नम उक्तिं तुरस्याहम्” ऋ॰ ५।४३।९ “नहि त्वा शूरो न तुरो न धृ